स्त्नावं तेजः अस्य आकाशा हव्य मानस्य तमसः॥ तरणिर्हि रेकं खलु तिवर्त्तकं मिति यावत्॥ वितीसंज्ञा
तनिघातः॥ अर्थे। रुगतौ। उषिकुषिगार्तिभ्यः स्थन् इति थन्॥ गुणः॥ नित्वादाद्युदात्तः॥ तरणि॥ त्रु प्लवन तरणयोः॥
अत्रिस्तृभूधमीत्यादिना निप्रत्ययः॥ गुणः॥ प्रत्ययस्वरः॥ ॥ अथचतुर्थी॥ अग्नेस्त्वमिति। सहसः सूनुर्ब
लस्य पुत्रं मथनरूपेण बलेन निष्पद्यमानत्वात् सनश्रुते सनातनाद्गु प्रसिद्धौ जातवेदः संजातप्रज्ञ तमि
मम गिरं दवात हवितु जातदेवा वक्षि हविषां वोढारे अत्र एव तानु ऊर्वता मनश्रुतं। श्रुश्रवणे कर्मणि क्तः॥ स्त
तीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। वक्षि वहप्रापणे निरित्यनुवृत्तौ वहिश्री त्यादिना निप्रत्ययः॥
अश्रु एव तां अविहिं साकरणायाः॥ इदित्वानुम्॥ धिन्वि कृण्व्योरच्चेत्यप्रत्ययः॥ अकारश्चांतादेशः॥ लङि व्यत्य
यनात्मानपदं॥ निघातः॥ [illegible]पंचमी॥ अदाभ्य इति। मानुषीणां मानाज्जातानां पुरुषतां सन्मार्गप्रदर्श
ननाय तोयं ता अतएव त्र्संसिताः प्रज्ञाः विविक्ति प्रवर्त्तकं चेनोनासु प्रदातुं त्वरायुक्तः। आलस्यरहितः स्थः
हविषां वहनाय स मदहशः सदा सर्वदा तक मणिनवः तनः न युर्मथनादाज्ञिनवः एवं विधोग्निः अदाभ्यः
अहिंस्य नकेनापि तिरस्कार्य इत्यर्थः॥ अदाभ्यः। दंभु दंभने। दंभ प्रेति वक्तव्य विति कर्मणि ण्यत्। उपधा २८

वृद्धिः॥ नदाभ्यः नञ् समासे तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरत्वं॥ पुरएतां॥ एण गतौ। सुलूटचा
गुणः॥ द्वित्वादंतादाच्॥ मानुषीणां। मनोर्जातावञ्यतौ पुक्चेति अञ् हिहाणाश्रितिङी पञित्वादाद्युदात्तः
त्वरा संभ्रमः इति धातो निरित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निरिति निप्रत्ययः॥ ज्वरत्वरेत्यादिना
ऊठ् तस्य नित्वादाद्युदात्तः॥ संहितायां ढूलोपे पूर्वस्य तिदीर्घः रथ्यः॥ दनिकामिनी रमिका वि इत्यइतिथ
प्रत्ययः॥ कित्वादनुदात्तापदेशेत्यादिना नुनासिकलोपः॥ नित्वादाद्युदात्तः॥ सदास्वराद्दिपुत्रच आद्युदात्तत्वं
नपंहितत्वादाद्युदात्तः॥ इति द्वितीयस्य प्रथमे नवमो वर्गः॥ ॥ तमिति[illegible]॥ साकाद्विश्वाइति। अ
त्रियुजः आजिया अश्वाः विश्वाः सर्वाः सिनाः साक्षात् सदमानः स्ववालन तिरस्कुर्वाण अश्वकः शत्रु निरदिस
तः देवानी ऋतः कत्वाहविः प्रदानताप्यापकः एवं भूतोग्निः उविश्रवस्तमस्तु विशाश्चो बहुवाची उ विश्व
इति तन्नामसु पाठात्। श्रवः शब्दान्नवाची श्रव इत्यन्ननामाः श्रूयत इति निरुक्ते विधानात्। अतिशाय
नविधमन्नाय तावद्वीति यस्मादेवं तस्माद्स्मानपि बहुविधान्नाप्तताकरोत्विति ताव साक्षात्सा
हमर्षणात्य स्वरूपः सोसा क्षात्मा। क्षांघति निपातनाद्विर्वचनं निडागमश्च नन्तवति परस्मैपदे च

Indira Gandhi National
Centre for the Arts

नवति। कसुस्वरः। ऋजुः॥ ऊनः ऋजुः किचागुणाभावः॥ उवङादेशः॥ अंतोदात्तः॥ ऋवः॥ ऋवेण। हूयतेकं
मितिकर्मणि असुन्प्रत्ययः॥ अतिशायनेन विश्रवा इति अतिशायातमविदितमयं। बहुव्रीहौ पूर्व
पदप्रकृतिस्वरः॥ ॥अथ सप्तमी॥ अग्निर्यथा सोति। दाश्वान् हविर्षां दाता मर्त्यो मनुष्यो यजमा
नः वाहसा हविर्षां वाहकना अग्निना प्रयांस्य नामिश्रुत्य श्नोति। अग्निः सर्वतः प्राप्नोति किं च पावक शोचि
षः बाधकदीर्घ रायसकाशात्। त्वयं शृदं चाच्याश्नाति। प्रयांसि प्रीडुखीणतो। अस्माद्धातोरेतन्नावि
ताण्यर्थोदसुन्प्रत्ययः॥ प्रीणयतितन्हानिति प्रयांस्यन्नानि लिचादाद्युदात्तः। वाहसाणि दिव्यनुवृत्तो
विदितदाश्वसः छंदसीत्यसुन्। णिश्चा उपधा वृद्धिः। निस्वरः। दाश्वान्। दाशृदान इत्यस्यासो दाश्वासा
कानिति निपातनादिडागमाद्विर्वचनं च न भवति। कसुन्प्रत्ययस्वरः। अश्नोति। अश्नु व्याप्तौ। व्यत्यये
न परस्मैपदं। निघातः॥ ॥अथाष्टमी॥ परिविश्वानीति। जातवेदसः जातप्रज्ञा विश्वानि धाविना दा
त्रादयां वयं अश्मलव संबंधिनिः मनसिर्निननीयास्तान्मे विश्वानि सर्वाणि सुक्षिता निसुदिता निसु
हुविता ग्र्यतिलिखितानि तत्स्वनिषय रूपामसर्वत आक्रयामः जातवेदस इत्यत्र विग्रहं जाता १९

निसर्वाणि वेत्तीति जातवेदाः सर्वज्ञ इत्यर्थः॥ यता हृशं जातवेदस्त्वमग्ने रेवोचितमितितद्विशेषेण
वेयुक्तं। सुधितं दुधाञ् करणादौ पोषणयोरित्यस्माद्धातोर्निष्ठायां छंदसीत्यनुवृत्तौ सुधित वसुधित ने
त्वादिना निपातितः॥ वोश्छंदसि बहुलमिति शालुक्। गतिरनंतर इति गतेः प्रकृतिस्वरः॥ अरपाम
अश्व्यासो बहुलं छंदसीति ऋप्रत्ययस्य लुक्। व्यत्ययेन परस्मैपदं। यासुट्परस्मैपदेषूदात्त
इतियासुटोलिङः सलोप इति सलोपः॥ अदेत चासौ वादियाद्दाशा न भवति मसः सकारस्य नित्यं डे
त इति लोपो॥ निघातः॥ मन्मभिः॥ मनु अवबोधने। अन्येभ्योपिदृश्यत इति मनिन्। निस्वरः॥ ॥अथ
नवमी॥ आग्नेविश्वानीति। हे अग्ने वार्यं वरणीयानि संभजनीयानि विश्वानि सर्वाणि धनानि वान
सुयुद्धेषु सनिषामहे वयं संभजामहे। यतः कारणात् देवासः सर्वमस्मान्निरिच्छादेवा अस्मदृत्वि
मतफलप्रदानायात त्वयि परिरक्षाः समंतादागमन त्वयि प्रतिष्ठा इत्यर्थः। सर्वं यापि त्वं सका
ज्ञातफललाभमहीतिसावः॥ वार्याः वृङ् संभक्तौ। ऋहलोर्ण्यदिति ण्यत्। वाश्छंदसि बहुलमिति रा
लुकं। ईडवंदत्यादिना आद्युदात्तः॥ वाजेषु। वृषादित्वादाद्युदात्तः। सनिषामहे। वनषणसंभक्तौ।

Indira Gandhi National Centre for the Arts

घस्यादिषु सः॥ लेटि च्लेर्लुगिति सिपू॥ सिप अर्धधातुकत्वादिडागमः॥ लेटोडाटावित्यडागमः॥ वात्य
यनात्मनेपदं॥ निघातः॥ वो युष्मच्छब्दस्य सन्म्यां वादेशः॥ सुपामिति शे आदेशः॥ शे इति प्रगृह्य
संज्ञा॥ ईरिरे॥ ईर गतावित्यस्मात्परस्य लिटो झस्य इरेजादेशः॥ इजादेश्च गुरुमत इत्याम् न भवति मंत्रत्वा
त्॥ निघातः॥ ॥इति तृतीयस्य प्रथमे दशमो वर्गः॥ ॥इंद्राग्नी इति नवर्चं द्वादशं सूक्तं विश्वामित्र
मैंद्राग्नं॥ तथा चानुक्रम्यते॥ इंद्राग्नी ऐंद्राग्नमिति॥ गायत्रं त्वित्यनुवृत्तत्वादिदमपि सूक्तं गायत्रं॥ इंद्रा
ग्नी देवता॥ आग्निप्रवाके चेदं॥ सुप्रातःसवने छावाकशस्त्रे आवापार्थमिदं सूक्तं॥ सूत्रितं च षष्ठ
दोनीति खंडे सूत्रितं॥ इंद्राग्नी आगतमा क्रवेपयोरिदमिति॥ अग्निष्टोमे छावाकशस्त्रे इंद्राग्नी आग
तमिति स्तोत्रियस्तृचः॥ तस्यैवाच्छावाकस्य याः शस्त्रयाज्या इंद्राग्नी आगतं सुतमिति याज्या इति सू
त्रितत्वात्॥ चतुर्विंशाहनि प्रातःसवनेऽच्छावाकशस्त्रे इंद्राग्नी आगतं सुतमिति षल्हस्तोत्रियः इंद्रा
ग्नी आगतं मिंद्राग्नी नाना हवादिति सूत्रितं॥ अग्निष्टोमाच्छावाकशस्त्रे इंद्राग्नी अपसस्परीत्यनु
रूपस्तृचः॥ सूत्रितं च॥ इंद्राग्नी आगतं सुतमिंद्राग्नी अपसस्परीति॥ तस्मिन्सूक्ते प्रथमा॥ इंद्राग्नी आगतमि २०

ति॥ इंद्राश्च अग्निश्च॥ इंद्राग्नी हे देवौ सुते अभिषवादिसंस्कारैः संस्कृतमत एव वरेण्यं वरणीयं सं
भाजनीयं इमं सोमं प्रति गीर्भिः अस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिराकृतौ नभः नभसः स्वर्गस्थाना
दागतं आगच्छतं॥ आगत्य च धिया अस्माभिः क्रियमाणकर्मणा इषितौ प्रेरितौ युवां अस्य पाड इम
सोमं पिबतं॥ यद्वा धिया अस्मदीयया बुद्ध्या इषितौ ज्ञातौ अस्मत्कृतया प्रेरितौ युवां मम सोमं पिबतं॥ इंद्रा
ग्नी इंद्राश्च अग्निश्च वाद्यभीति अग्निशब्दस्य पूर्वनिपाते प्राप्ते अजाद्यदंतमिति इंद्रशब्दस्य पूर्वनिपातः॥ पाद
द्वित्वान्निघातप्रतिषेधः॥ षाष्ठिकस्वरः॥ गमतां गमस्तृगतौ॥ बहुलं छंदसीति वा पा अनुकिंसति अनुदात्तोप
देशात्यादिना मकारलोपः॥ निघातः॥ पारण्यां हटुसंज्ञकौ॥ वृद्धणः॥ इषादिवादावादिकदेशः॥ पातेः पापान्
सार्वधातुके छंदसि विकल्पत इति न पिबादेशः॥ नपित्र॥ इषगतौ॥ इत्यस्माद्धातोर्निष्ठायां तीषसहेतीडा
गमः॥ आगमा अनुदात्ता इति टोनुदात्तत्वाक्स्वरः शिष्यते॥ ॥अथ द्वि[illegible]॥ इंद्राग्नी जरितुरिति॥ ह
इंद्राग्नी जरितुः स्तोतुः स चास्य स्वर्गादिलक्षणफलप्राप्तौ सहाय भूतो यज्ञः ज्योतिष्टोमादियज्ञसाधनभूतः वे
तनइंद्रियाणं त्वचति चिता आप्यायनकरी मन्त्रमोमासमः जिगाति युवा मतिमिच्छति॥ अया अस्मदीय

यास्तुत्यपेस्तुतिलक्षणयान् यावाचा आहूतोसौतोस्तुतः अनिषुत्वा दिसंस्कारोपेतं इमंसोमं पातं
पिबत। जिगाति। गास्तुत्या वित्ययंधात्वर्थगमनवर्तीत। छंदसि जुहोत्यादिः। बहुलंछंदसीत्यासस्य
त्वं। निघातः। वतनः। वितोसंज्ञानं। कर्तरिबहुवचनाच्छटा लितोत्पाकदात्तत्वं। आया। इयमाप्तस्य
तृतीयाया। सुपांसुलुगितियडादेशः। अनादिग्राप्तौ हलिलोपः। पातं। पापाने। निघातः॥ ॥ब
अथ तृतीया॥ इदमग्निमिति। सायज्ञस्य धनवृतस्यासामस्यजूत्याजूतिः। प्ररणंसामस्त्तवेद्यये
नमानोपरयतिसाधनमुपलभ्यत आध्याक्रातोयजमानः प्रवर्त्तत इतिहितस्यप्रेरकत्वं। तया। प्ररण
रूपया जूत्याप्ररितादं कविछदाकवीनांस्ता हणं। उचित फलप्रदानपापछदाकोइंद्रमग्निंच
युवांहाणासोमपानार्थ। मह कर्मण्यागच्छतमिति संताजता आगातोचतविद्वांसौ इह कर्मणिसोम
स्यासोमपानन्नृप्यतंतृप्यतं। इंद्रंइदिपरमैश्वर्ये इत्यस्माधातोरुरनो। इद्राग्नीति रन्त्रत्ययांतत्वे
ननिपातनाद्युदात्तत्वं। कविछदा। छदिअपावरणे। अस्माक्तिप्। सुपांसुलुगिति सुपोडादेशः। हृ
उत्तरपदप्रकृतिस्वरत्वं। जूत्याजूइति सौत्रोधातुः अस्माडदात्तइत्यनुवृत्तौ ऊतिइतिजूतीत्यादि २१

नानिपातनादंतोदात्तत्वं। उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वं। हणो। हड्संतानो। आप्र
त्ययः। टितआत्मनेपदानां। मिनीरएत्वं। निघातः। ना। सुपांसुलुगितिडादेशः। सोमस्य। पुजान्ति
ज्ञाचा अस्मादन्निसुक्स्थध्वजीत्यादिनामन्त्रत्ययः। नित्स्वरः। इपतं। तृपप्रीणने लोटिमुचादित्वात्नुं
मागमः। निघातः॥ ॥अथ चतुर्थी॥ ताभावृत्रहणोति। ताशावावृर्णेबाधाको। वृत्रहणावृत्रस्य
पापस्पहंतारौ सजित्वानासमानानतारौ इंद्राग्नीयुवांकुवइहकर्मणिसोमपानार्थमहमाह्वयामि
वृत्रहणा। हनहिंसागत्याः। ब्रह्मभ्रूणवृत्रेषुक्विवितिक्विप्। एकानुत्तरपदेणइतिणत्वं। कृउत्तर
पदप्रकृतिस्वरत्वो। हुवे। ह्वयतेबहुलंछंदसीति लुकिसतिह्वः संप्रसारणमित्यनुवृत्तौ बहुलंछं
दसीतिसंप्रसारणं। उवङादेशः। व्यत्ययेनात्मनेपदं। निघातः। सजित्वाना। जिजये। इहशिरुदि
जिस्थक्लिदिभ्य इति क्वनिप्। किवाजुणानावः। पिच्चात्नुगागमः। समानसछंदस्यमूर्द्धइतिसमानस्यस
भावः। कृउत्तरपदप्रकृतिस्वरत्वं। अपराजिता। नञ्समासतत्पुरुषे तुल्यार्थेतिपूर्वपदप्रकृतिस्वर
त्वं। इंद्राग्नी। देवताद्वंद्वेचेत्युभयपदप्रकृतिस्वरत्वे प्राप्तेनानुत्तरपदेऽनुदात्तादाविति प्रतिषेधे

Indira Gandhi National
Centre for the Arts

समा सस्वरः। याजसातमा। षणु दाने। अस्मा ज्जनसनखनक्रमगमः इति विट्। विड्वनोरनुनासिक
स्यादित्याकारः। अतिशायानतमबिततमपौ। उत्तरपदप्रकृतिस्वरत्वं। अथ पंचमी। ववामर्चंतीति।
दइंद्राग्नी उक्थितः ऊक्थं शास्त्रं तद्वंतः शस्त्रिणो होत्रादयः वां युवां प्रार्चंति। इक्ष कर्मणि स्तुतिरूपा
त्रिवाग्निः सृजसंति। तयानाथाविदः। स्तोत्राणिशाः सामगानकुशला जरितास्तोतार उद्गात्रादयः
अभिलषितफलावाप्ययुवा सर्वति। स्वमपि ह्वाष अन्नस्यलाभार्थं इंद्राग्नीयुवामाह्वाणसर्वत
संतानजह्वयामीत्यर्थः। युवां। युष्मच्छब्दस्य द्वितीयायां पदात्परता द्युष्मदस्मदोः षष्ठीचतुर्थी
द्वितीया इत्यादिना वामित्यादेशः। अनुदात्तत्वं। अर्चंति। अर्चेर्लनायां। निघातः। उक्थितः। वच परि
भाषणे। पातृदिवचिरचातिकर्मणि थक्। वचिस्वपीत्यादिना संप्रसारणं। उक्थं शास्त्रं। उक्थमेषां
अस्तीति इनिठनाविनिः। यस्येति लोपः। प्रत्ययस्वरः। नाथाविदः। णीञ् प्रापणे। अनिकुषिरमीत्या
दिना थन्। किच्चाद्गुणाभावः। विद ज्ञाने। क्विबेति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। इंद्राग्नी। आ
मंत्रितत्वां छंदा नवां वृणे। वृङ् संभक्तौ। निघातः॥ इति तृतीयस्य प्रथमे एकादशो वर्गः॥ ॥ब २२

अथ तस्मिन् सूक्ते षष्ठी। इंद्राग्नी नवतिमिति। हे इंद्राग्नी दासपत्नीः। दासयंतीति दासा उपक्ष
यितारः शत्रवः ते पतयः पालका यासां ताः दासपत्नीः। नवतिं नवतिसंख्याकाः पुरः पर्वविक्षाः शा
त्रूणां पुरीः। एकेन कर्मणा एतेन वाय्वा॥ न युवां सह युगपत् अधूनुतं अकंपयतं। ताविंद्राग्नी आ
कयामीति शेषः। नवतिं वचनानो दशतीनवतावः तिप्रत्ययः। प्रत्ययस्वरः। तादात्रः। दासपत्नीः
दसु उपक्षये। दासयतीति दासः। पचाद्यच्। चित्वादंतोदात्तः। ते पतयो यासां। नित्यं सपत्न्यादिषु
दासादेश्च वाहिन्नाषासश्च वस्यपतिङीप्। इकारस्य नकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं।
अधूनुतं। धूञ् कंपने। लङि स्वादिभ्यः श्नुः। निघातः। एकन इण् गतौ। इणभीकापाशल्यतिमर्चिभ्यः
कन्निति कन्। निच्चादाद्युदात्तः॥ ॥अथ सप्तमी। इंद्राग्नी अपस इति। हे इंद्राग्नी धीतयः सामस्य
ध्मतारः पातारो होत्रादयः। कृतस्य कर्मफलस्य पथ्या पथ्यामायानि अनुलक्षीकृत्य अपसः अ
स्मानि: क्रियमाणस्य कर्मणः परिसर्वतः उपयंति समीपप्रकर्षेण वर्तंते। अतः सोमपानार्थं
युवामागच्छतमिति शेषः। यद्वा धीतयः स्तुतयः कृतस्य यज्ञस्य मार्गमनुलक्षीकृत्य कर्मणः परिव

Indira Gandhi National
Centre for the Arts

प्रवर्द्धिति। अतः स्तोतव्यत्वाद्युवामागतमितियंति। इणगतौ। यणादेशः। निघातः। धीतयः। धेट्
पानइत्यस्मात्कर्त्तरिक्तिच्। युवमास्थेतीर्थं। चत्वादंतोदात्तः॥ ॥अष्टमी॥ इंद्राग्नीतविषाणिति
हे इंद्राग्नी वां युवयोः तविषाणि बलानि वयांसि अन्नानि च सधस्थानि परस्परं वियुजा वर्त्तंते। तथा
अप्तूर्यं उदकप्रेरकत्वं युवोः युवयोः हितं निहितं वर्त्तते। तस्मात्सोमपानप्रभृतिषु सर्वकर्मसु
इंद्राग्न्योः स्वाहेसु वर्त्तमानमितिनाद्वः। वाचष्टी दिव वच नेत्यामित्यादशः॥ अथ नवमी॥ इंद्राग्नी रोचनेति॥
हे इंद्राग्नी दिवासि वना स्वर्गस्थिता रोचना प्रकाशकौ युवां वाजेषु संग्रामेषु परिभूषथः। परितः सर्वतः
अलंकृतो भवथः। शत्रून्पराजित्य सवीता विजयमानौ वावर्त्तेथां। वां युवयोः वीर्यं सामर्थ्यमवतन्नाद्दर्श
संग्रामविजयं प्रचेति। प्रकर्षेण ज्ञापयति। यद्वा युवां वाजेषु संग्रामेषु परिभूषथः। शत्रून्परिभूषथः। वा
सुष्टुवत्। रायवत्। रुचदीप्तावित्यस्य अणुदात्तेतश्च हलादेरिति युच्। चित्वादंतोदात्तः। भूषथः। भूष
भूषाणे। निघातः। चेति। चिती संज्ञाने। अयं सतत्त्वाचित एष्यर्थः। बहुलं छंदसीति शपो लुक्। तकारलो
पञ्चदशः। इति तृतीयस्य प्रथमे द्वादशो वर्गः॥ ॥तृतीयमंडले प्रथमानुवाकः॥ द्वितीयेनुवाके 23

प्रवोदेवायेति [illegible] ५

सप्तसूक्तानि। तत्र प्रवोदेवायेति सप्तर्चमाद्यं सूक्तं आनुष्टुभं। अत्रानुक्रमणिका। प्रवः सप्तऋ
षभस्त्वानुष्टुभमिति। विश्वामित्रपुत्र ऋषभनामक ऋषिः। मंडलादिपरिभाषया अग्निर्देवता। अग्निष्टोम
इदं सूक्तमाज्यशस्त्रे पराध्याया वा द्वृतिसूत्रितं। प्रवोदेवायेत्याज्यमुपसंतनुयादिति। इदमेव
सूक्तं प्रातरनुवाकाश्विनशस्त्रयोर्विनियुक्तं। सूत्रं च प्रवोदेवायाग्नय इति पंच तिस्रन्य
दायाष्टौ सर्वां तत्र महर्दाज्याज्या सूत्रितं च। समयतो विप्रएषांदीर्घंस्तैः सूक्तं इति। तस्मिन्सूक्ते प्र
थमायजमानो होत्रादीन्प्रतिब्रूते। हे होत्रादयो वः युष्मभ्यं बर्हिषि नेदेवाया द्योतमानायाग्नये अस्मि
न्कर्मणि स्तुत्याय गायत वर्द्धितं बृहतं इदं च सूक्तं इदं स्तुतिरूपं स्तोत्रशस्त्रादि वा ज्ञातं प्राचैश्च
न१ रय। एवं स्तुतः साग्निः देविरियष्टिभिर्द्देवैः सहितः सन्नः अस्मान्प्रति आगमत्। आगच्छतु। आगत्य च
यजिष्ठः। १ यष्टृतमः साग्निः बर्हिः अस्मान्निवेद्यां स्तीर्णं बर्हिषि आसदत्। आसीदतु। उपविशतु। बृ
हिषि बर्हिरवाक्ष्यानुछंदसीत्यतिमायानइयन्। अर्च्च अर्चजायां। नोवादिकः। बहुवचनास्येकव
चनं निघातः। गमत्तु गम्लृगतौ। अस्यछंदसि लुङ्लिङ्लिट इति लिङर्थे लुङ्। — तुदिबास्तरदृ। नित्यंडित

Indira Gandhi National Centre for the Arts

हा०वर्षाद्विच्यामपमान

इतीकारलोपः।पादादिवान्निघातः।यजिष्ठः। ॥यष्टृशब्दात्तुछंदसीतीष्ठन्।तुरिष्ठेमेयस्विति
इतीकारलोपः।निस्वरः।सदंतापूर्ववत्त्रोडात्यीलुटाघट्टविशारणगत्यवमादनेष्विंत्यस्याच्वरिवादड
इत्वालोपः।निस्वरः।सदंतापूर्ववद्यडाद्यौलुडाघद्वविशारणगत्यवमादनेष्विंत्यस्यान्त्रःरादसी इमयो
निघातः॥ ॥अथद्वितीयोरुतावाय्यस्यतिमिसम्पूर्वमंत्रप्रतिपादितस्याग्नः।रादसी इमयो
वाहृथिव्योवरोनेवतः।अग्नःप्रकाशकत्वेनतदधीनप्रकाशकेनवत्तुइत्पर्थः॥किंभूतस्ययजमा
नस्य फलप्रदानेनरक्षितारादेवाःदक्षेयस्याग्नबलंसर्वतसेवातइतियास्कः॥अग्नयजिमानदत्त
हविःकामयमानाःहविर्वहनार्थंतामवाग्निमालतेस्तुतिरूपानिर्वाग्भिःप्रजयंति।किंचशामिष्यतःधना
दिलाननिच्छंतस्तस्रअवसेरक्षणायतमेवाग्निमाश्रयंत।रुतावा।ऋतशब्दात्तदस्यास्तीतिच्छंदसिवाणि
वक्तव्यावितिवनिप्।अन्येषामपिदृश्यतइतिदीर्घः।वनिपःपित्त्वादनुदात्तत्वप्रातिपदिकस्वरः।सर्वंते
स्तत्रसमवाय।वत्येभनात्मनपदे।यदृत्ताद्यागादतिघातः।सनिष्यंतः।सनितोनंस्वामि छंतः।सुप
आत्मनःक्यच्।सर्वप्रातिपदिकेभ्यो लालसायांसुगसुकइतिक्यचिपरतःसुगागमः।क्यचःस्वरः।
॥ ॥अथतृतीया।संयतेति।विप्रामेध्मावीकमाति३ः अग्निःएषांकालापराधेनहविर्निर्विपंतितच्चतो २४

स२

हा०वरदत्तत्वेनतदधीनाद त्वर्थःएवभूतःमोनिर्भीतावाहृत्यकर्मासत्यसेवं त्यद्दत्त किंवकृतिनिष्पतःसभूतत्वविद्यायजमानाः५

यजमानानांयथोक्तकर्मप्रदर्शनेनतत्रप्रवर्तकः।अथकिंचयज्ञानांज्योतिष्टोमादीनांसोग्नि
नियंताफलप्रदाननियामकः॥द्विअसिरुग्ने।अतएवसर्वस्यनियंताखलुकिंचसाग्निःदाताज्यो
तिष्टोमादिकर्मफलदातामघं मेदनीयंधनंमघंरत्नइतितन्नामसुपाठात्।तद्धनंवनितावयच्छं
वतिच।सेवधिनंनाहशामग्निदरुत्विजोयंइवस्यतआऊतिसदानानपरिस्वरतइवस्यतिःपरि
चरणाकमीनमस्पतिइवस्यतीतितन्नामसुपाठात्।यंता।यमउपरामइत्यस्यद्विपा।रुड्ज्ञानसिता
दित्यादिनाअनड्डादशः।द्विस्वरः।अथाहिनिघातस्यतिदीर्घःइवस्यतइवःपरिचरणातदिच्छंतःसु
प.क्यच्।तदंतस्यधातोर्लिटिरूपदाता।डुदाञ्दाने।ताच्छीलिकस्तृन्।निवादाद्यदात्तः॥ ॥अथचतुर्थी।
सनःशामीणीतिसाग्निःहविःप्रदातृयोस्मत्यजेतमापशुपुत्रादिकमृध्मईअतिशायनस्तुन्रवकराणिशामि
शाख्याशृहवाचीछायाशर्ममामीतितन्नामसुपाठात्।तथाविधानिगृहाणिदीतायसंभजनायअग्निहोत्रादि
कर्मप्राप्यर्थंयच्छतुददातुयतःयस्मादग्नःसकाशात्सुज्ञवत्तसमृद्धिमतदाननोगादिनाव्याप्यंयेसत्यपि
अतिशायनवर्द्धमानंदिविद्यलोकेसाक्षितिस्पोत्तलोकात्।अंसुअंतरिक्षेचसमुत्पन्नंवसुवनाद्याक

असाधारणेन वर्त्तमानं धनं आ समंतात् उप नमति यतो मे प्रसादात् त्रिषु लोकेषु विद्यमानं धनं अस्माक
मागच्छति। साधिरिति शार्वणाद्वयः॥ वीताय। वी गतिकांत्यादिषु। मंत्रे वृषेषपचे इत्यादिना क्तिन्। उदात्तत्वेन
निपातनादुदात्तः॥ यद्वा। ओयम उपरामे। इत्यस्मात् मिथमाछतिमकारस्य छः॥ इष्टवत्। इमस्तेदनो सचनस्वर
णेषु। अस्मादौणादिको नक् प्रत्ययः॥ तदस्यास्तीति मतुप्। तस्यादात्ततात्तावछांदसः॥ ~ ॥ अथ पंचमी॥
दीदिवांसमिति। ऋक्। हे कारवः स्तुतिं कुर्वाणाः शास्त्रिणो त्रादयः दीदिवांसं दीप्यमानं सर्वस्य तेजस्वितया द
एमस्त्रिन वे होतारं देवानामाह्वातारं विश्वां प्रजां पश्यति प्रजानामति शायन पालयितारं नमस्विवस्वीन्निधयास्ता
न्तिः अस्पधीतिन्तिः अग्निविषयस्तुतिलक्षणाभिर्वा गिर्भिर्वस्वीभिर्वसुमद्भिः अस्पधीतिन्तिः एतदुद्देशेन क्रियमा
णैः कर्मभिः इधते दीपयंति स्तोत्रं करणाद् द्विः प्रदानादिया पारेण समृद्धिं कुर्वंति। दीदिवांसं। दिदुक्रीडा
दावित्यस्य क्वसोरूपं। तुजादीनामित्यभ्यासस्य दीर्घः॥ लोलोपाव्यारितिलोपः। वस्वीभिः। वसुशब्दात् दत्यये
नदीनां। निस्वरः॥ धीतिभिः॥ धेट् पाने॥ क्तिन्। चाकोचसंज्ञायामिति क्तिन्। किंवा घुमास्थाती तीत्वं। चित्स्वरः। ऋक्। कारणः॥
नडीनां। निस्वरः॥ धीतिभिः॥ धेट् पाने। क्तिच् क्तौ च संज्ञायामिति क्तिच्। किंवा घुमास्थेतीत्वं। चित्स्वरः। ऋक्। कारणः॥ २५
ऋचशब्दाच्चलेवनिप्। अयस्मयादित्वात् भसंज्ञत्वात् कुत्वं। पदसंज्ञा नावात् जस्त्वाभावः। इंधते। इंधी दीप्तौ। वि

स्पतिं परादिषु दसिबहुलमिति फत्तरपदाद्युदात्तत्वं। विश्वांसा वस्काचइति विलक्के रुदात्तत्वं। छा॥ ॥ अथ
षष्ठी। उत नइति। उत अपि च हे अग्ने नः यज्ञकारिणामस्मानू ब्रह्मन् ब्रह्मणि अस्माभिः क्रियमाणे स्तोत्रे अ
च्छ। उत नइति। उत अपि च हे अग्ने नः यज्ञकारिणामस्मानू ब्रह्मन् ब्रह्मणि अस्माभिः क्रियमाणे स्तोत्रे अ
विषास्तात्रविषयं नकनातिरक दोषाय ध्यानं नवति तथा पालये। किंच हे देव बहुतमः। देवानामाकाष्ठ
तमस्तुं उक्थेषु अस्माभिः क्रियमाणेषु आज्य प्रउगादिशस्त्रेषु अविषः गोपाय। किंचम रुद्धं अमरुद्धि
वर्धमानः सहस्रसातमः सहस्रसंख्याकस्य धनस्यातिशायनदाता त्वं नः अस्माकं शंप हिकया मुष्मिकं
च सुखं शा वदीपय वर्धय इत्यर्थः॥ अविषः अवरक्षणादिषु इत्यस्या लटि सिबहुलमिति सिप्। अस्याच
धमत्रुकं चादिष्टः इत श्लोपः इति सिप इत्याकारलोपः॥ लोटो डा टावित्यडागमः॥ निघातः। उक्थेषु। वचपरि
नाषणे। अस्माकं कर्म्मणि पातृतुदिवचिरिचीत्यादिना थक्। किंच संप्रसारणं। वित्यय स्वरः॥ देव बहुतमः॥
कयातः॥ क्विप्। बहुलं छंदसीति संप्रसारणे परपूर्वत्वे हलइति दीर्घः॥ उत्तरपदप्रकृतिस्वरत्वं। गोपा
युचदीप्तो। अयमंतर्नावितण्यर्थः॥ निघातः॥ मरुद्धः। वृधु वर्धने। इगुपधगुणधलक्षणः कः॥ मरुद्धध
दिवाब्दस्वपदांतोदात्तत्वं। सहस्रसातमः॥ षणु दाने। अस्य जनसनखनक्रमगमो विडिति विट्। विड्वनो

स्वनासिकस्येत्याकारः॥ ऋडुत्तरपदप्रकृतिस्वरः॥ ॥अथ सप्तमी॥ नूनो रास्वेति॥ अस्मिन्नृथमाने हे
अग्ने सहस्रवत् सहस्रसंख्योपेतं तोकवत् पुत्रपौत्रादिसहितं पुष्टिमत् पोषयुक्तं अन्नेन शरीरस्य
दीशादिहाशबलोरा पदं गवादिकमुपलक्षितं। द्युमत् दीप्तिमत्। आनन्तरं कनकादिकं परिदृश्यमानं।
सुवीर्यं शोभनसामर्थ्योपेतं तत्कार्यक्षमं वहारण्यं वर्षिष्ठं अतिशायनवृद्धं प्रवृद्धतम् अत एव अनुप
क्षितं। व्ययक्रियमाणे ऽप्यनुपक्षीणं एवंभूतं वसु रत्नकनकपश्वादिलक्षणं धनं नः अस्मभ्यं नु क्षिप्रं
अविलंबेन रास्व देहि। नूनः ऋचि तुनुघमक्षुत्रेति दीर्घः। रास्व। रा दाने। अस्य लोटि रूपं। व्यत्ययेनात्मनेप
दं। अदादित्वाच्छपो लुक्। निघातः। सहस्रवत्। मादुपधायाश्चेति मतुपो वत्वं। कर्दमादित्वान्माध्योदात्तः॥
सहस्रशब्दः। पुष्टिमत्। पुष्टि पुष्टि। अस्मात् क्तिच्। प्रत्ययस्वरेणान्तोदात्तः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्त
त्वं। वर्षिष्ठं। प्रियस्थिरेत्यादिना वर्षादेशः इत्यादेशः। निःस्वरः। अनुपक्षितं। क्षि क्षये इत्यस्य दीर्घेणावान्नि
ष्ठानत्वेन नवति। तत्पुरुषत्वादव्ययपूर्वपदप्रकृतिस्वरः॥ ॥इति तृतीयस्य प्रथमे त्रयोदशो वर्गः॥
अग्निर्होतेति सप्तर्चं द्वितीयं सूक्तं आग्नेयं अनुक्रमणिका। ऋषस्त्विति। अनुशासनप्रयोगादस्यापि रह २६

स्य ऋषस्त ऋषिः। अनुक्तत्वात् त्रिष्टुप्। अग्निर्देवता। एतदादीनि सूक्तानि तृतीयाष्टमवर्जितानि प्रातर
नुवाके आश्विनशस्त्रे त्रैष्टुभे छन्दसि विनियुक्तानि। अथैतस्मादिति खंडे सूत्रितं। अग्निर्होतेति दशानां तृ
तीयाष्टमवर्जमिति त्रिष्टुभमिति॥ ॥तस्मिन् सूक्ते प्रथमा। अग्निर्होतेति ऋषस्तोऽग्निं स्तौति। होता दे
वानामाह्वाता इन्द्रः ऽमुमदायिता सत्यः सत्यकर्मा कवितमः अतिशायनमधावी। देवानां यज्ञाय
द्यावधाः सर्वस्य जगतो विधाता। एवंविधमहिमोपेतः। सोऽग्निः विदथानि अस्माभिः क्रियमाणानि यज्ञा
आस्थात्। आतिष्ठति प्राप्नोति। किंच विक्रद्व्यः द्योतमानो या नापतः सा विश्वेशः शार्वोष क्वालाः के
शायस्मेरु ज्वाला मयाकशोपतः महसः सूनुः बलस्य पुत्रः एवंभूतः सोऽग्निः पृथिव्यां विश्वी स्त्रितं तरि
द्वाणाजः तेजः स्वकीयां प्रज्ञां अग्रेता अश्यां तत्तिष्ठापयति। वृहत्पृथिव्यां नामो वर्तमानः। पाजः बलास व
ता। मंद्रः मदि स्तुतिमोदमदकांतिगतिषु। अस्मात् स्फायितंच्यादिना रक्। इति चासुमास्थात्। गतिनिघातः॥
छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्। गातिस्थेति सिचो लोपः। निघातः। यद्वा अजादेर्वेह्रजां संगतिक
रणदानेषु। सुप्रे ऽजोऽइति निति ह्वानिप्। तस्यमिवादनुदात्तत्वे प्रत्ययस्वरः॥ शाविक्रद्॥ शुचदीप्तौ॥

Indira Gandhi National
Centre for the Arts

अविश्व विक्रस्त पिछदिहर्द्विं शाविषादीप्यासमानःसमतिष्ठाः तिष्ठसि तस्मादतेंदेवाःइजयतीति
अविश्व विक्रस्त पिछदिछद्विं शाविषादी इत्यादि उज्ञावछांदस ॥ तिष्ठा घा गति निवृत्ता वित्यस्य लटिरूपं यद्य
अर्चन अर्चिज्जाया मित्यस्य लङिरूपं अउज्ञा वछांदस ॥ तिष्ठा दशस्या क्रदात्रचेन निपातना द्दा क्रदात्तः ॥ स्वर्यैः राजरूपस्यार्य
मादनिघातः ॥ यावत्यादिनातिष्ठा दशस्या क्रदात्रचेन निपातना ॥ दाक्रदात्तः ॥ स्वर्यैः राजरूपस्य
तिक्यबृतात्वननिपात नाम्नर्दघ्याःमिद्गानवति ॥ ॥ [illegible] ॥ वयंत इति ॥ हे अग्ने उज्ञानदस्यादृ
विश्वीकरणाउज्ञानपाणया वयं काम कमनीयं [illegible] दिदविः तउच्य अद्येदानी मस्मिन्नम
[illegible] रिदमन्न मदश्च नमसा नमस्कोरेण उपसद्य प्रसान्ना स्वाय जिष्ठेनयहृताम नयागच्छावता
[illegible] सा अतःकरणेन देवाद्यक्षिय [illegible] यां इसिरितीसिः ॥ प्रत्ययस्वरेणांतोदात्तः ॥ बहुभ्रीदोइव
पदप्रकृतिस्वरः ॥ अश्रत ॥ श्रिज्ञा सवाया मित्यस्य छंदसिवद्गमानलङ्‌ ॥ बहुलंछंदसीति शपो लुक् ॥ सा
वधात्रकगुणः निघातः ॥ ॥ अथ द्वितीया ॥ अयामितइति ॥ ऋताव ऋतं सत्यंतायज्ञः तद्वन्‌ हे अग्ने
तत्र विषया नम उक्तिं नमस्कार वाक्यं महृकवया मि प्ररयामि उज्ञारयामि सहस्वः साहाबलं तद्वन्नग्ने
चितान चेतयितृ कर्मणः प्रज्ञापकाय उच्य नम उक्तिः क्रियते तां जुषस्व अस्मानिः क्रियमाणां नमस्का २७

किसेवस्व ॥ किंच विद्वान्‌ आनुष्टयी ण देवाक्का नाति ज्ञो कर्मीरिज्ञानु आवह्नि आवहन ॥ किंचयत्रय
प्रद्याहृ अग्ने ऋताय अस्माकं रक्षणाय माध्वरदिस्त्रीर्मस्य बर्हिषा माध्य आनिषत्सि अासीदा
निषीद ॥ अयामि इणगतौ ॥ लोवादिः ॥ पादादित्वादनिघातः ॥ जुषस्व ॥ जुषीप्रीतिसेवनायाः ॥ अष्टा
दिः ॥ लोटिरूपं ॥ निघातः ॥ चितान ॥ चितीसंज्ञाने ॥ शाउलसार्वधातुकस्वरेणाउदात्तत्वातांता
दात्तवान्नावाछ्रउरतुम इति विनक्रे रुदात्तत्वानाव ॥ धातुस्वरः ॥ महस्व ॥ साहास्पातिमतुपू सकार
स्यतासोमवर्थ इति संज्ञकत्वात्तरुनलवति माउपधाया इतिमतुपावत्वं ॥ उगिदवामिति नुमाइश्चा
दिलापितिनकारस्य मनुवसोरुरितिरुत्वं ॥ आमंत्रितनिघातः ॥ विदुष ॥ विदज्ञाने अस्येतस्माद्रउत्र
रस्य शत्रु विद ॥ शाउवंसुरिति वस्वादेशः ॥ सप्तज्ञायां वसाः संप्रसारणं प्रत्ययस्वरः ॥ सस्त्रि ॥ सदवि
शरणादिषु ॥ लटिबहुलंछंदसीतिशपो लुक् ॥ शित्वत्ययपरत्वानावासीदादेशानाव ॥ सादरवात
रिति षत्वं ॥ यजत्र ॥ यजादवष्टजादिषु ॥ अमिनक्षियजीत्यादिन त्रत्प्रत्ययः ॥ आमंत्रितनिघातः ॥ ॥
अथ तृतीया ॥ इवसांतइति ॥ हे अग्ने वाजयंती वाजमन्नं ऊर्वीणा उषसा उषासानाक्का अहोरात्रा

Indira Gandhi National
Centre for the Arts

तेवा इतो अग्निमच्छतां त्वमपिवातस्य वायोः पथ्याभिर्मार्गैः यच्छता रहोरात्रो शीघ्रमभिगच्छाय
यस्माद्धारणादाहोरात्राभ्याः परस्पराभिमुखेन अन्योन्य संबंधः तस्मादहोरात्रयोः सायंप्रातः
कालयोः द्रुष्टिरातनं त्वाष्ट्रिजाक्षिरिर्निराज्य दिनिः सीसवीताडे तिसिंचति। किं च वं धुरव
यथाक्रु वस्थानं परस्परससक्रषाद्यायापेतेतद्धंससंक्रोतावादाहोरात्रो उगाणा अस्माकं यादृ अग्नि
होत्रादिकर्मसिध्यर्थं आवृत्य पुनः पुनः रावर्तमानो संतो तस्त्वतुः तिष्ठतो दूवतो इगता वित्यस्यला
टिरूपं। पथ्याभिः पथिषु साधवइत्यार्थे तत्र साधुरिति यत्तनस्तद्धितश्तति हिलोपः। तिष्ठरित इतिस्व
रितः। तस्त्वतुः। तिष्ठतलिघ्यत्वमिरूपं। निघातः॥ ॥ अथ चतुर्थी॥ मित्राइति। सदस्वः वलवताद
अग्निमित्रावरुणश्च मित्रावरूणौ विश्वे मरुतः सविदेवाश्च उत्थं वदर्थं सुम्नं स्तोत्रं अर्चनं यदं तिय
दासादेवाः उत्थं वा सुम्नं सुखेन अर्चनिष्पजयंति यच्च स्माकारणारणा तु सहसस्पुत्रादे अग्निस्स
दासावदेवाः उत्थं वा सुम्नं सुखेन अर्चनिस जयंतिय्च स्माकारणारणातु सहसस्पुत्राद अग्नेस्स
र्यः सुप्तु अर्यः स्वामीय दासवतिर्यामितया सुष्टु प्रेरकः यथास्यः ग्रासनवीर्य अग्निर्हिती। क्षिति शा
ह्याम लुच्छवाचो विशः क्षितय इतितन्नामसु पाठात्। मनुष्यानभिलक्ष्य शूनमागच्छ दत्तकिंचनने २८

सूनु आत्मनो रश्मीन् प्रथयन् सर्वतो विस्तारयश्च चाचिषादीप्त्या समानः सन तिष्ठाः तिष्ठसि।
तस्मात देवाः अजतीति अर्चनं अर्चं इजाया मित्यस्य लडिरूपं अउत्तावस्थादसः। तिष्ठाघागति
निहन्नावि त्यस्य लटिरूपं यद्योगादनिघातः। याव्वित्यादिनातिष्ठादस्यस्याथ दीर्घः। तावननिपा
तनादाह्क दानः। सूर्यः राजरूपस्येतिक्यं बतत्वेन निपातनात्स्वधर्याः सिद्धान्तवति॥ ॥ अथप
चमी॥ वयं तइति। हे अग्ने उज्ञानहस्ताः हविः स्वीकरणाद्युत्तानपाणयावयं का मं कमनीयं उराउ
शादिहविः तत्रस्थं अद्यदानीमास्मिकर्मणि ररिमदह्मः नमसा नमस्कारेण उपसद्यउससद्मोद्भूवा
यजिष्ठ नष्ट्रतामनयागेन्धावता मनसा अंतःकरणेन देवाच्युक्तिथ्यजनीयादेवान्चा जह्नजय।
किंच विप्रो मक्षवी कर्मा निजस्वं अस्रेधता अद्दीपेन प्रवृत्तेन मनमना मंतव्येन स्तोत्रेण देवान्स्रज
या अद्य सद्यः परुत्यार्यं च सइत्यादिना निपातितः। अतादास्य। रिरिमदानइत्यस्य वर्तमानेलि
ट्यिरस्मैपदानां णाना नुसित्यादिनामासादेशः। क्रादिनियमादिडागमः। अतालोपिइटीत्याकार
लोपः। द्वियोगादनिघातः॥ आगमा अनुदात्ताइटोनुदात्तत्वात्प्रत्ययस्वरः। उपसद्याषड्विशारण

Indira Gandhi National
Centre for the Arts

गत्यवसाने थ्वस्य क्का समासेन्त्वूर्वैत्स्त्यिप्।लित्स्वरः॥यच्छि।याजदेवष्टत्रा संगतिकरणदानेन
लाटिबुञ्लेछंदसीतिशपोलुक्।षष्ठ्येकोव।मिपाद्याद्दशासावब्छंदसः॥अस्वधता।स्विधिः
द्वयार्थः।तस्तुरुषेनञः स्वरः॥ ॥अष्टमी।वक्षितत्रेति।सदसस्य त्रबलंस्यत्रदेअग्नेद
वस्यदेवनशीलस्यकमंकरणप्रदत्तस्ययजमानस्यव्रतं व्रतःसकाशाद्धवीः प्रभूताःअंतत
त्या।विघ्नपरिहारेणकर्मपरिपालनादिरूपपदा।वियंतिविविधंगच्छंतिखलुतमिमंयजमाने
प्राप्नुवंति।किंचाहअग्नेत्वंसहस्रिणंसहस्रसंख्याकरयिंधनंनोस्मभ्यंदेहितथाअदोघेणा
हरहितस्यपापस्यन्येनवचनवादशःउमएकवचनस्यात्वत्पदादेशः।एकादशास्वरःत्रस
हसःपरमपिछंदसीति।परांगवद्भावात्तयोःसर्वत्तुदात्तत्वं।ददि।तुदात्तदानइत्यस्यलाटिप
स्मारवाविचिधातारवंत्रा।अन्यासलोपश्चोनिघातः॥अदाघेणाअहुदजिधांसाद्या।घञ्।दाघःघका
रछांदसः॥नञ्सत्त्यामितकरस्वरपदात्तेदात्तत्वं॥ ॥अथसप्तमी।उच्यंदक्षेति।दक्षितिसघ्ट्रृतया
सामर्थ्योपितकविकृतोअर्तीदियविषयप्रज्ञोपतसर्वज्ञदेवदीप्यमानदेअग्नेमत्रीसायजमाना २९

तथावाजाःतथाअन्नानिवियंतिएतंयराजानप्राप्नुवंति ७६

वयंत्वस्यत्वदर्थयानीमानिदवींषिअध्वरेयज्ञेअकमहिविस्त्यागमकामत्वंचसुरथःसाशोत्तन २२
ध्यातान्नापतस्यविश्वस्यसर्वस्ययजमानस्यबोधिगापायितात्तवामीतिबुध्यस्व।अस्तुतमरणाध
मरहितायइदास्मिकर्मणिअस्मात्तिदत्तंसर्वहविःस्वदआस्वादय।अकर्म।डुकृञ्करणइत्यस्य
लङिछंदस्फत्यथेतिनसआर्द्धधातुकत्वेननङिचाल्लावाजःयद्वत्तयोगादनिघातः॥बाधिबुधअ
लङिछंदसिलुङ्लङ्लिटइतिसर्वादेवाःदीपज्ञनबुधेत्यादिनाकर्त्तरिचि
वगामान्यछंदसिलुङिलाङर्थेलुङ्तिङोतिङोत्तवतीतिसवादेवाः।दीपज्ञनबुधेत्यादिनाकर्त्तरिचि
णाच्चिणोलुमितितशब्दस्यलोपः॥अश्नाव॥छांदसःस्वरः।स्वदआस्वादने।अंतत्तीवितएर्थः॥ला
टिरूपः॥निघातः॥ ॥इतितृतीयस्यप्रथमेचतुर्दशोवर्गः॥ ॥विपाजसाप्टथुनतिसप्तद्वं
तृतीयंसूक्तंत्रिष्टुन्नमाष्टुक्तंनेयं।अत्रेयमनुक्रमणिका।विपाऊसाका।वाकीलस्विति।कतागात्रे
त्पन्नोकीलोनामऋषिःप्रातरनुवाकाश्विनशस्त्रयोरादौतत्यादिसूक्तदशकंविनियुक्तं।तत्रेदं
चद्वितीयंसूक्तं।तस्मिन्सूक्तेप्रथमाविपाजसेतिअकीलकास्तोमति।दिश्याग्नेप्टथुनाविस्तीर्णनपातसा
तेजसाशाउचानःअत्यर्थदीप्यमानस्त्वंद्विषःकर्मानुष्ठानविघ्नकारिणःशत्रून्बाधस्वविनाशय

[stamp]

Indira Gandhi National
Centre for the Arts

सनाद्राय अथा अमी वाः रोगराहित्येन सामर्थ्यापतानि रक्षसा उत्तनयत्र सुष्युत्ययः॥ तानिरक्षांसिबाध
स्वा कर्मविघ्नकारीणि तान्यपनुदस्व। यद्वा अमीवाः आर्त्तिमुत्पाद्य न अमनपरागमनपराः पिशाचिकाश्च
बाधस्व। सुशर्मणिः स्वर्गादिलक्षणे भोजनमुखाद ताहृहतः मदतः शत्रुं विजयेन प्राप्तम दिव्यसुदव
स्य सुद्धा को नापतस्य। अग्नेः शर्मणि अस्माकं सुखदत्तो भणीतो। उत्तर त्वया दिस्यानेष्ठप्रणायनेकर्षी
नयनेतत्र तत्रानय प्राह्णपः। एवं च तेन वप्रणयैस्मान च दस्य। ग्रथि प्रणायन द्वर्वक कत्व तुषान नवेय।
प्राजसापार हृणे। असुन्नित्यनु वर्त्तमाने पातबील जुक्केत्यसुन्। जुडागमः। निवादा कन्दाने। इयुना। प्रथमस्यानो अदि
त्यनुवृत्तौ वधिमदि स्व स्तौ संप्रसारणमिति उप्रत्ययः। तत्रं निपातन संप्रसारणं प्रत्ययस्वरः॥ शाखचा
नः। अचदीशावित्यस्य यजुकि सर्गोयजुको रित्यत्या सस्य गुणः। ह्यत्यायन शानचा वृक्तीत्यस्य। दायेच ज्ञवा
नयोलुक्। विवादेतोदा तत्वप्राप्त अन्त्यस्वानामादिरित्थ। त्याकदा सह। बाधस्व। बाधृ लोडनडत्यस्य लोड
नइत्यस्य लोटिरूपं। पादादित्वान्निघातनावः सुशर्मणि॥ शृहिंसायां। उरुवं शृणातीति अणादिकोमनिन्॥
।सार्मनसीत्फ स्वरपदाद्य दात्तत्वं। स्यां। असूत्तुवीत्यस्य लिङ्‌या सुटूपरस्मैपदे भित्या दिनापाद्यन्ताति हसे ३०

लोपहृति सलोपः॥ यासुरात्‌ङिद्वात अनसोरह्लोपः॥ निघातः॥ अथ द्वितीया। यन्नो अस्या इति हे अग्ने त्वंअ
स्याः अद्यवर्त्तमानायां उपसः व्युष्टौ व्युच्छने प्रकाशने स्तर स्तूयेऽदितवसतिनः अग्निहोत्रादिकर्मणि
प्रवृत्तानामस्माकं गोपाः गोपायिता नवामीति बाधि बुधस्व। कचिन्नुयोदयात्वाग्निहोत्रं जुहुतिक
चिडदिततस्मिन्नूजुहुतितथा मुनायनं पालयिता नवत्यर्थः। तत्त्वा सुजाता ज्ञालापरिवृतेन धारारण सु
सुजात दहीप्यमानं अथवातत्वा सुजात अत्म निव सुजात स्वयं च रश्मि इर्थः। ताहश्च त्वां ममदीयं स्तोम
ग्रहं च दशादिलक्षणं स्तोत्रं नित्यं जुषस्व। तत्र हृष्टीनः॥ जाम्भावतिय छा जन्मजनक पिता अरसं तनयं
उत्तं परिष्ठंगादिभिः सवते। तद्वदस्माभिः क्रियमाणमिमं स्तवस्व व्युष्टौ उच्छीविवासे। तस्माद्विवास्य
तनयतिकरणेक्तिन्। वस्वादिनाषत्वं। तादौ च निति कृत्याचिति गतेः। प्रकृतिस्वरत्वं। गोपाः गुप रक्षणे
गुपधूपविच्छिपणिपनिभ्य आय इति आय प्रत्ययः। तदंतात्। आत् क्विप्। आतो लोप इत्यकारलोपः। लोपोव्यो
रिति यलोपः। धातुस्वरः। जुषस्व। जुषी प्रीतिसेवनयो रित्यस्य लोटिरूपं। निघातः॥ ॥ अथ तृतीया।
वं च चक्षा इति। हे वृषत्काम नावर्षितः। हे अग्ने त्वं च चक्षा नृणां मनुष्याणां अशुभाशुभकर्माणि द्रष्टा असि

सुरारूषु अरुषः आरोचमानस्त्वं अनु अनुक्रमेण पूर्वीर्बह्वी ज्वालाविनादिविशेषेण प्रकाशयस्व सोऽस
स्य प्रकाशप्रदानेन स्वस्वरूपानेव वासयितः अग्ने अस्मानस्मान् नमिकमाद्विरूप फलानि प्रापय्य।
अंहः अस्माकं दारिद्र्यलक्षणं पापं अतिपारयनिवारय तियावत् किंच यविष्ठ युवतम हे अग्ने नो स्मानश
२५ रधनायदुशिजः कामयमानानू अपिकुरु। अभिलषितफलप्रदानेन पालककामानूकुर्विन्यर्थः॥ वृचक्षाः
चक्षिङ् व्यक्तायां वाचि। अयम त्र दर्शनेवर्त्तते। ८ अस्तुभिन्नित्यनुवृत्ते वर्दो बर्किलेशिलेत्य सुना। शिरुरूवातस्या
च्चक्षिङ् व्यक्तयां वाचि। अयमत्र दर्शने वर्त्तते। ८ असुन्नित्यनुवृत्ते वदे बकिलेशिलेत्य सुना। शिरुरूवातस्या किदिति अन्ने च। कि
स्यादशानावः। लङ्कुत्तरयदप्रकृतिस्वरः॥ वृषन्। वृषसेचने। अनिजित्य तृहातो रूपिवृन्यां किदिति अन्ने च। कि
वाद्गुणाभावः॥ अपादादिवान्निघातः॥ इवर्वः। पुरूशङ्कस्य वातोयुणवचनादित्ति डीप्। आघस्योकारदीर्घःछां
दसः॥ प्रत्ययस्वरेणान्तोदात्तत्वाहि। अंतर्नावितण्यर्थः॥ लाटिरूपं वासा। वसनिवासे। उदित्यनुवृत्तो सृ
वृम्निहि तृप्यसिवसीत्यादिना उप्रत्ययः॥ पादादित्वान्ननिघातः॥ षाष्ठिकमाद्युदात्तत्वं॥ नाबिगणि प्रापणो
छंदसि लोडार्थे लिट्। बहुलं छंदसीति शपो लुक्। आमंत्रितं पूर्वमविद्यमानवदिति आमंत्रितस्य। विद्यमान
वनपादादित्वान्ननिघातः॥ पापि। पापालनपूरणयोः॥ वादिभ्य इति न निघातः॥ अधि डुकृञ् करणे इत्य ३१

स्य लोटि सर्वप्यि चेति हिरादेशः॥ तस्य अश्शपुष्व्ह्लस्य छंदसीति धिरादेशः॥ बहुलं छंदसीत्यप्रत्य
यस्य लुक्॥ पादादित्वान्ननिघातः॥ शायरा। ताडिति डिप्रत्ययः॥ उडिदमित्यादिना विभक्तेरुदात्तत्वं॥ उशिजः
वशकान्तौ। वशेः कित्तति जिप्रत्ययः। कित्वात्संप्रसारणं। प्रत्ययस्वरः॥ यविष्ठ। युवशब्दात्दतिशायेन इष्ठ
प्रत्ययः॥ स्थूलदूरयुवेत्यादिना यणादिपरस्य लोपः॥ पूर्वस्य गुणः॥ आमंत्रितत्वान्निघातः॥ ॥ अथ चत
र्थी॥ अषाळ्हो अग्न इति। हे अग्ने अषाळ्हः शत्रुभिरसोढः अपराजितः स्वयं शत्रून् जयतीत्यर्थः॥ वृषन्
कामानां वर्षयिता एवंभूतस्त्वं भिषः सर्वाः पुरः शत्रूणां पुरी। स्तोत्रगा तत्रत्यानि शत्रोत्तनान्यनमान् निधना
निच संजिगीवान् सम्यग्जयन् दीदिहि स्वदीप्तो ज्वालाभिर्दीप्यस्व। सुप्रणीता शोभनप्रणयन जातवेदः
जातप्रज्ञ हे अग्ने त्वं ततः अपेदिप्रपति दिष्ट दिविधतिकद्भयिता कलापेन महतः पापाद्यास्तत्फलप्रदान
नरक्षकस्य प्रथमस्य मुख्य तया प्रथमक्रियमाणस्य एषवारप्रथमेयाज्ञा यज्ञा नायाज्याति ष्टोमस्य
तिमुता ताहशस्य ज्यातिष्टोमो रख्यस्य ननता हविर्वहमदेवताकानादिक्रियायामनिर्वाहिकान्तवा अषा
ळ्हः षद्मर्षणिइत्यस्य निष्ठायां हाढ इति ढकारः॥ झषस्तथोर्धोध इति कस्य ढकारः ढलोपे इति ढलोपः
Indira Gandhi National
Centre for the Arts

पूर्वस्य दीर्घ इति दीर्घः॥ उवाचातावश्छांदसः॥ सद्देः साढः स इति सकारस्य मूर्द्धन्यादेशः॥ अव्ययपूर्व
पदप्रकृतिस्वरेण स्वरः॥ वृषन्॥ वृष सेचने। रुषिवृषिभ्यां किदित्यनवु। चित्स्वरः॥ दादिहि। दिधुक्रो
डादावित्यस्य उकलोटो मध्यमैकवचनं संज्ञापूर्वको विधिरनित्य इत्यस्मात् सस्य गुणाभावः। साव
विधयश्छंदसि विकल्प्यंत इति पूर्वत्रासिद्धमित्यस्या प्रवृत्तो परत्वात् चेति दीर्घः। पञ्चाहलोपः।
सोत्तगा। सुत्तग मंत्र इति उजात्रादिषु पाठात् वाद्युदात्तः। रुरुगमि धातेइति पूर्वपदस्य वृद्धिः। उत्तरप
दस्य वृद्धिर्नवति। सर्वविधीनां छंदसि विकल्पितत्वात्। सुपासुलुगिति सुपो डादेशः॥ तेनवसोनाग
नधनान्यफलदेशात्। निचाद्याद्युदात्तः॥ संजिगीवान्। जिजाय छंदसि लिट्। तस्य कसुः॥ सन्लिटोर्जेरिति
कवर्गादेशः॥ प्रत्ययस्वरः॥ दीर्घश्छांदसः॥ पाय्याः पारक्षाण। सत्वयोजिमीत्यादिना उण प्रत्ययः॥ आतोयु
क्चिण्कृतोरिति युगागमः॥ प्रत्ययस्वरः॥ ॥अथ पंचमी॥ अच्छिद्रा शर्मेति। जरितः सर्वस्य जगतोत
कालजरयितः॥ हे अग्ने सुमेध्यः॥ शोभनप्रज्ञापते दीधानः स्वतेजसा प्रकाशमानः चंदवानयष्टव्या 32
न्नादवान् अच्छअनिलदम्यतउद्देशेन क्रियमाणानि सुकृतानि शर्म स्वर्गादिसुखसाधनत्वं तान्यग्निहोत्रा

दीनि कर्माणि अच्छिद्रा अच्छिद्राणि ऊद्धा। कर्टकमसाधनविकल्यरादित्यनसंइस्मानि ऊरु। किं
चाहम् आग्नेवे सस्निः सं निरूस्वकीयं सततगमनं सनिरूध्यदविः प्राप्ति पर्यंतम् अत्र वर्त्तमानस्त्वं वाजं ना
स्मान्निदीयमानं दविलक्षणमन्नं अस्तिदवानस्निलद्धयदक्षियद्दः प्राप्य। तत्रदृष्टांतः॥ रथो न रथ इव
यथा रथ्या धन्यादिकसद्दातस्त्वा मिनं प्रापयति तद्वत्। किंचत्वं शम रोदसी द्यावापृथिव्यो सुमाक
न्ना त्ननरूपो पते स्वकीय प्रतानिः प्रकाशयुक्ते कुरु। दीधानः दीदति दीप्तिकर्मा तिस्त्या शानचात्र
भ्यस्थानामादिरित्यादि घुदात्तत्वं। सुमेधः॥ नित्यमसिच्। प्रजामेधयोरित्यसिच्प्रत्ययः। बहुब्रीहौ
नञ्सुस्यामित्युत्तरपदांतोदात्तत्वं। सस्निः। षसस्वाप्ने। अस्माद्दोणादिको ननि॥ निवाद्युदात्तत्वे।
वहि वृद्धत्रा पणा। अस्या लोट्॥ सिपिबहुलंछंदसीति शपो लुक्। हश्च कोवी। हिरादेशः॥ छांदस
वान्नभवति। अथ षष्ठी॥ त्वपीपयेति। हे वृषन् कामानां वर्षितः। हे अग्ने त्वंनो अस्माकं पपीपय अनिलषि
तफलानि वर्द्धय। वाजानन्नानि वाजिद्य प्रयच्छ। किंचदेवदीप्यमान हे अग्ने सुरुचा शोभनदीप्त्या रु
चानः शोभमानैस्त्वं देवतियजनायदेवैः सहितः अस्माकं रोदसी इमे द्यावापृथिव्यौ सूद

षेद्दृष्टिद्वारा अभिमतफलप्रदानेन सुखदो। मृळीके रु। तथा मन्द्रःस्थिरात्रो ऽभूमितिः उष्णु बुद्धिप्रयुक्तानि
नव नास्मान मापरिष्टात। परितो मागच्छ आपाप्य। पीपा नइत्ये तस्य एणु तस्य स्तुतिचा ऽऽद्वि वचनास्मा
सदा भोसियो लोपश्छांदसः। जिह्व। अविजि विधिविप्रीण नार्थे। एतस्य लोटि श्रिद्दिचा चुमः। ञापः। आता
हेरिति हेर्लुक्। आमंत्रितस्याविद्यमानत्वेन अतिङन्तत्वान्नाविद्याने निघातः। सुदोघोदाहेनोदोघः। ला
वेधन्नो। ऊत्वं छांदसं। आक्रदानेः घञ् छंदसी ल्फ उत्तरपद दाक्रदान्तत्वं ऽभूमतिः। मनु अवबोधने मन्यत
इतिमतिः बुद्धिः कर्तरि क्तिच्। ऽस्ता बुद्धि। अथ पूर्वपदप्रकृतिस्वरत्वे उत्तरपदस्य प्रकृतिस्व
रत्वं॥ ॥अथ सप्तमी॥ इलाम ग्न इति उतो पिष्ट स्वामित्यस्मिन्वर्गे व्याख्यातेयसूक्ता। इति तृतीयस्य प्र
थमे पंचदशो वर्गः॥ ॥अथ मग्निशिति चतुर्थी षड्र्चं सूक्तं आग्नेयं। अत्रानुक्रमणिका। अयमग्नि
प्रागाद्यौ मकलेश्विति सुशाष्टप्रयोगादस्यापि सूक्तस्य स एव ऋषिः अत्र विषमसंख्यानामृचां वृहद
ताछंदः। तृतीयपादस्य द्वादशास्य द्वादशाक्षरत्वात् समसंख्यानां सता वृहती प्रथम तृतीयपाद
त्याद्वादशाक्षरत्वात् उक्तं च। अयुजे जागतो सतो वृहतीति॥ ॥तस्मिन्सूक्ते प्रथमा। अयमग्नि २२

रिति। अकीलःस्तोति। अयं यजनीयत्वेना अत्यानिर्दिश्यमानोग्निः सुवीर्यस्य शोभनसामर्थ्योपित
स्य महामहतः। सौभगस्य सौभाग्यस्य ईशे ईष्टे ईश्वरो भवति। सर्वस्य बालाराध्य देवतया सौभाग्यकारि
त्वात्। तथा गोमतः गवादिपशुयुक्तस्य स्वपत्य। शोभनापत्यस्य रायो धनस्य ईशे ईष्टे वृत्रघ्नानां उद्धाज
वात्। तथा गोमतः गवादिपशुयुक्तस्य स्वपत्य शोभनापत्यस्य रायो धनस्यानईशे वृत्रघ्नश्च उद्धाज
न क्रियमाणकर्मफलसंपादकत्वेन तत्स्वामित्वात् तथा पवक्तातोग्निः वृत्रहथ्यानां दमनं दस्यः शत्रुहत
पापविनाशानामपी। ईशे ईष्टे यि समर्पितकर्मणामस्माकं वस्तु सादात्यापद्वयो भवीतीति तस्यापिस्या
मी। ईशे ईशाए श्वर्ये। अदादित्वात् छपो लुक्। लोपस्त आत्मनेपदेष्विति तलोपः। पादादित्वादनिघातः। सो
त्तगस्य। सु भग स्य भावः। सौभगं। उद्गात्रादित्वादञ् सर्वविधीनां छंदसि विकल्पितत्वादत्र ऽऽ ऽऽगात्यादिना
प्राशायाउत्तरपदवृद्धाद्वरत्ना वः। रायः कड्डिदमित्यादिना विभक्ति रुदात्त ऽऽ ईशा निघातः। स्वपत्यस्या नञ
सुत्वामित्फ उत्तरपदान्तोदात्तत्वं वृत्रहथ्यानां। हन् अवदाने। अस्मात् स्फायितं विवंतीत्यादिना रक् प्रत्ययः
किद्वादगुणः। हनहिं साशात्य। रित्य स्मात् हनि ऊषी नीरमिकाशि भ्यइति कन्। कित्वादनुनासिके लोपः। त
उत्तरपदप्रकृतिस्वरः॥ ॥अथ द्वितीया। इमंनरइति। नरः कर्मणां नेतारः हे मरुतो देवा यूयं वृप अत्रा
दिवर्द्धकं। इममस्मानिः स्तूयमानमिममग्निसश्चत हविरानयनार्थी सचध्वं। कीदृशास्ते मरुतः इत्याकाद्वायाम

रुतं दियस्मिन्देवो रायो धनानि शोरे धमसः दानन्तोगाद्य प्रयोगेन सुखस्याद्र्दिकानि संति यच्च देवाः प्रत
नासुमनासुततुडरन्निषेष्वन्तितेष्वसंग्रामेष्वद्यः उ ध्रुधमानाप्तानात्मानान्दष्टारश्चादन्तुः श्चादन्तु वंति
हिंसंतिपर्वतृतास्ते सार्वमरुतो यूयं तमिममग्निं सर्वधमितिद्राविणाव्ययः सश्रुता प्रसंगइत्यस्मात्विटि
रूपं। जकारस्य च त्यायनचकारः॥ निघातः॥ वाष्टधमसः॥ वस्मिन्व्यत्ययः। ग्नं सुखं वर्धयतीति श्रुसुनित्य
सुत। गुणास्तावश्वादसः॥ गतिरकारकपाश्वपद प्रकृतिस्वरत्वं। वात्यो णादिकस्तत्रातद्धर्वपद प्रकृतिस्वर॥
संति। अस्रुत्तुविद्धद्या। ध्येचिंतायां। आच्च्यो पिहग्र्पत इति क्विप्। इग्निग्रहणासंप्रसारणं। उरो दात्तानां
शाददृ। धासु रेवक्रुध्व। उत्तरपदादात्तुच्वति उच्चढाव। छेदस्फनयोघ्यति शासि इष्टडादेशबाधि वापणा
दन्नः नउत्तरपदप्रकृतिस्वरेणोदात्तः॥ जसुः॥ सुद्धादनुदात्तान्वालते उदात्तस्वरितायायणइति शासः स्व
रितत्वं। अदेवुः॥ दन्तुदेने। अस्मात्विद्धसिरूपं। श्रधिग्रधिदंतिधंजो नामुपसंख्यानमिति किंवशावादनु
नासिकलोपः॥ द्विर्वचनप्रकरणे छंदसि वति वक्तव्यमिति द्विर्वचनाभावः॥ सतिशिष्टस्वरोबलीयानितिप्र
त्ययस्वरः॥ ॥ अथतृतीया॥ सत्वंनोरायइति। हे अग्ने सतथाविधस्त्वंनोस्मान्रायः तृतीयार्थे षष्ठीधनेनशि २४
शीहितीहानूकुरु। अस्मान्धनसमृद्धान्कुरु। किंचत्रविधस्त्वंबहुधानाप्तं श्रुतवमीढ्वः मीढ्वन्कामानां

सेक्तः हे अग्ने यं वर्षिष्ठस्य हरुतमस्य प्रस्तूतं साप्रजावतः अपत्ययुक्तस्य अनमीवस्यारोग्यहेतोः अत
गवशुष्मिणः बलहेताः सुवीर्यस्य शोभनसामर्थ्ययुक्तस्यान्नयुक्तस्य संबंधिनास्मान्कुरु। यद्वाप्त
सर्वविविज्ञातयातया याजनीयं एताः षष्ठ्यः तृतीयार्थे। एतदुक्तं भवति धनेनापत्यारोग्यशरीरबलो
प्रतनाम्नवचास्मान्समृद्धान्कुर्विति। शी दिशि निशामन इत्यस्य लङि बहुलं छंदसीति विकर
णस्य लुक्॥ वा छंदसि विकल्पेन द्विश्वादङित्वेति दीर्घशादेशो न भवति। दीर्घश्छांदसः॥ निघातः॥ मीढ्वमि
दसेचन इत्यस्य क्वसौ दाश्वान्साह्वान्मीढ्वांश्चेति निपातनाद्द्वित्वं। उपधादीर्घस्य संबुद्धौ नुमित्सोत
दह्याब्लोपे संयोगांतलोपे च कृते मरुत्वसारुः सबुद्धौ छंदसीति रुः॥ पादादित्वादाद्युदात्तः॥ ॥ अथव
उष्टी॥ चर्षणय इति। यायमग्निः चक्रिः सर्वस्य जगतः कर्ता सच विश्वा भुवना विश्वानि भुवनानि व्याप्ति विशति
सत्रुष्टा तदेवानुप्राविशदिति श्रुतेः॥ चक्रिणः कर्तामाग्निः सासहिः सुरोहा शादिहविस्तार सदनशी
लः सनुडुवः अस्मान्निदंहविः देवेषु यजनीयदेवेषु श्राश्रानयतु। सचाग्निः देवेषु देवनशीलेषु
स्तोरस्तु श्रूयताम्। आभिमुख्ये नगच्छति। उत अपि च नृणां यज्ञस्य नेतृणां शत्रिणां शासशासनं शासः। रा

स्त्रंतस्मिन्सोग्निरागच्छति। तथा नृणां मनुष्याणां सुवीर्यः शोभनवीर्योपेतसुक्रते दक्षाणायेमागच्छति। अ
ननाम्नेः सर्वव्यापकताप्रतिमादिता भवति। चक्रिः। डुकृञ् करणे। आऽदृगमहनजनः किकिनौ लिद्वकि
न्त्ययः। लिद्वद्भावाद्द्विर्वचनं। किंवा ऋणाभावः। निस्स्वरः। सोमसदि। षद मर्षणे इत्यस्मा घंऽत्तास्मद्विवदि
चलिपतिभ्यो यङन्तेभ्यः किकिनाविति किः प्रत्ययस्वरः। यततेर्यती प्रयत्ने। यद्वृत्ययोगात्कनिघातः। अंसे
सावघ्ना निस्स्वरः। नृणां। नृचेति विकल्पेन दीर्घाभावः। नामन्यतरस्यामिति विभक्तेरुदात्तत्वं॥ ॥ अथ पं
चमी। मा नोऽस्य इति। सदृसे सुत्रबलस्य पुत्रदेके अग्नेव नोऽस्मान् अमतये शान्त्रतये दारिद्र्याये मा रीर
धः संसिद्धाविषयवृतान्मा कुरु। किंचास्मान्ननिदे निदाया विषयवृतान्मा विधाः। तथा चं देषां सिकमी
परोधनिमित्तात्। दधा च अपारुधि अपाकुरु निवारय। अवीरतायै। अस्य सतीति वीरः। अर्शआदिवाद
च्। तस्य भावः वीरता। तस्य भाव इति तल्। नवीरता अवीरता नञः स्वरे प्राप्ते परादिश्छंदसि बहुलमि
ति नञ उत्तरस्यादेरुदात्तता। रीरधः रासो धः संसिद्धौ। अस्मात् ण्यन्तात् छांदसे लुङि णिश्रि— कच्य इति च
अडादिशः। णेरनिटीति णिलोपः। णौ चङ्युपधाया इति उपधाह्रस्वः। चङीति द्विर्वचनं सन्वल्लघुनि सध्य ३५

र इति सन्वद्भावः। सन्यतः इत्यभ्यासस्येत्वं। तस्य दीर्घो लघोरिति दीर्घः। न माङ्योगे इत्यडभावः। निघातः। अगोता
यै। गा। शब्दनागामाद्यता। नगोः अगोः अगा भविः। अगोता तस्य भाव इति तल्। लित्स्वरः। सदृसस्सुत्रा सु
बामंत्रितपरांगवद्भावात्। सदृसस्सुत्र इत्येतयोः स्वविनिदानत्वं। निदा। निदि कुत्सायां। अस्मात्संपदादिवाक्वी
क्विप्। अनित्यमागमशासनमिति नुमभावः। साभवकाच इति विभक्तेरुदात्तता॥ ॥ अथ षष्ठी। शग्धि वाजस्य
ति सुभग शोभनधनोपेत देव अग्ने अध्वरे अस्मासु क्रियमाणेऽस्मिन्नग्निष्टोमादिकर्मणि इह तोमतः प्रवृत्त
स्य प्रजावतः अपत्योपेतस्य वाजस्यान्नस्य शग्धि ईशिषे। तादृशमन्नमस्मिन्नध्वरेस्मभ्यं देहि। किं च त्वं विधक्
मृबकुधनेषु रुदेऽस्मे मयांसि तु नामय इति सुखनाम। शोवृधमय इति तन्नामसु पाठात्। तात्। द्वा नाघपयोगदे
उतया सुखस्य भावकेन अतप वयशा स्वता कीर्तिमता त्वयसा अतिवृद्धेन तनराया एवंविधेन धनेनास्माञ्
स्कृसायाजय। शग्धि। शक्लृ शक्तौ। शकेर्वितस्य लोटि बहुलं छंदसीति विकरणस्य लुक्। ऊरुङ्भ्यो हेर्धिरिति वि
त्ताकरुदात्तत्वं। तूयसा। बहुशब्दात् द्विवचनविभज्योपपद इति ईयसुन्। बहोर्लोपो भू च बहोरिति ईयसु
नः सर्वस्यालोपप्राप्ते आदेः परस्येति प्रत्ययस्यादेर्लोपः। बहोर्भूरादेशः। अयोनिस्स्वरः। सृजा। सृज विसर्गे त्वदादि

Indira Gandhi National
Centre for the Arts

जोतिरूपं। मयोभुवा। भूस त्ता यामित्यस्मादौणादिको भुप्रत्ययः॥ उविक्रमत्ना पादादिचादनिघातः॥ इ
ति द्वितीयस्य व्याख्या॥ षोडशो वर्गः॥ ॥समिध्यमान इति। पंचर्चं पंचमं सूक्तं आग्नेयं त्रैष्टुभं विश्वामित्र
स्य कतस्यार्षं तदुक्तं। समिध्यमानः पंचकं नो विश्वामित्रस्त्विति। आद्येते त्यादि सूक्तदशकस्य विनियो
गउक्तः॥ प्रातरनुवाकाश्विनशस्त्रयोरिति। तत्रेदं ७ चतुर्थे वाजाप्यायबार्हस्पत्ये उरावग्निं सुदीतिमिति।
स्विष्टकृता ७ याज्या वाजाप्यायनेत्यादिखंडे सूत्रितं। अग्निं सुदीतिं सुदृशं संश्रयंत इति संयाज्य इति त
स्मिन्सूक्ते प्रथमा॥ समिध्यमान इति। कतः स्तौति। कर्मधारणाद्धर्म अस्मर्यज्ञ निवर्हकृतयातनारकबाध
मोग्निः॥ तथा च मंत्रः॥ धर्माणामग्निं विदथ्यस्य साधनमिति। तादृशोग्निः॥ अथ मा प्रथमं यज्ञो प्रपक्रामन्नुत्तु
ग्यायतनेषु अत्र ऋ। मण समिध्यमानः सम्यक्दीप्यमानः यद्वा अत्र धर्मधर्मसाधनत्वात् स्रुयज्ञेषु प्र
थमसमिध्यमान विश्ववारः। विश्वैः सर्वैर्यजमानैर्यष्टव्यतया वरणीयः। शोचिष्केशः। शोचींषि ज्वालाः केशा
यस्य सतथोक्तः॥ घृतनिर्णिक्। घृतस्य तापनेन धाराविनयनेन नाशाधकः पावकः अस्मत्पापशोधकः पाचकः
सुयज्ञः शोभनयज्ञोपेतः एवंभूताग्निः देवान्स्मात्तिर्यजनीयाद्देवाच्यजध्वाय यष्टु अक्रुत्तिरंजनसाधने ३६

पत्र १ नवे पस्तु स्पस्तु छे॥ ३७॥ मा चपां वनुं र्ज र २ पक्री गत

घृतादिभिः सम्यग्ज्यते समक्तमित्यते। प्रथमा। सुपां सुलुगिति सुपां डादेशः॥ धर्मधृक्षरण इत्यस्माद्ध
त्यादृश्यत इति मनिन्। कस्ववेश्छांदसः। निस्वरः॥ अक्तुभिः। अंजू व्यक्तिगति म्रक्षणेषु। अज्यात रात्रिरिति वा
स्मादाईसीव्यधिकदानः॥ तिस्रः॥ त्रिशब्दस्य आद्यौ त्रिचतुरोः स्त्रियामिति तिसृ इत्यादेशः॥ अचिरऋत इ
तिरफादेशः॥ तिस्रभ्योज्स इति विभक्तिरुदात्तत्वं। आजानीः जनजननानि। जनिघसिभ्यामिणिति कर्त
रि इण्। णिवृ उपधावृद्धिः। बाच्छंदसीति वर्णदीर्घः॥ लउत्तरपदस्य प्रकृतिस्वरः॥ अवः। अव रक्षणे। असु
नित्यसुन्। निस्वरः॥ यक्षि। यज दानार्थस्य लेटि रूपं। यजमानाय श्रन्जा॥ कानेनितियजः शानन्नानि
स्वरः॥ यां। युमिश्रण इत्यस्माद न्यच्योपि दृश्यत इति विच्। आर्धधातुकलक्षणो गुणः॥ लउत्तरपदस्य प्र
कृतिस्वरः॥ ॥अथ चतुर्थी॥ अग्निं सुदीतमिति। जातवेदः जातस्य सर्वस्य वेदितः। हे अग्ने य एतः
व्रति विषयोः स्तुतिं कर्वाणाः वयं अग्निं अंगनादिगुणोपेतं सुदीतिं शोभनदीप्तिं अतएव सुदृशं सं दृशं सुद
र्शनीयं स्तुत्यमेवंविधं वो शानमस्याम॥ हविर्भिः पूजयामः। किंच देवाः अस्मान्नियजनीयाद्देवादाया
देवाः अरतिं न विद्यते विषायारतिः प्रीतिर्यस्यासौ विति: विषयेषु सक्तः अतएवामृतस्या देवान्नृता

Indira Gandhi National Centre for the Arts

याःसुधयानासिस्थानंद्यां ताद्दृशं हव्यवाहं इत मरुएवतद्विधां वोदारं इतं मएवनः। इतां हि द्विविधः। वाज्ञोका
रीः कार्यकरी चेति तेत्रचां कार्यकारिणीं इत मकार्थीरिति भावः। सुदीतिं दीप्तायादीयतविनाश्यात स्वं अग्निस्व
न इति करणे। क्विज्ञादातायादीनयः। बहुव्रीहौ नञ्सुत्यामिति फ उत्तरपदांतोदात्तत्वं। सुदृशीं दृशिरपिदृणात
स्मात्स्वकार्थे लल्संज्ञा द्वेका। विधिरनित्य इति गुणाभावः। सितीतिस्त्यायास्वर्वस्योदात्तत्वं। गृणंतः। गृणातिर
चेतिकर्मा। नमस्यामः। नमसः पूजायां। नमोवरिवश्चित्रङः क्यजिति क्यच्। उदंता। अटि रूपं। पादादित्वान्निघातः। इह
तांडु उपतापायां उतनिस्यां दीर्घश्चेति कः। नञ्संनियान धातो दीर्घः। इत इतस्ततः संचारीत्यर्थः। प्रत्ययस्वरः। अरति
रमुक्तोडायां। भावक्तिंच। अरत्यन् कविहिंसाकरणयोनिस्य सप्तडि। धिश्विकृ एथोरत्व्यक प्रत्ययः। अकारस्योतादेशः।
निघातः। ।अथपंचमी। यस्त्वेवोतति हे अग्ने वत्स त्वांनापि शब्दं प्रथमस्तावीयजीयाय अतिशायनयष्टायाः कश्चि
वोताहोमनिष्पादकः। द्विधाद्विधं मध्यमे चाग्नावमचस्वधया सोमाख्येनान्नेन सहसज्ञानिष्पन्नः सहशंत्वं यद्गृणां सुख
स्त्वरस्त्वात्। द्वितीयपादमृचं यास्को व्याचख्यौ। द्विता च संशी स्वधया च शंतुः। द्विधं संज्ञा मध्यमे च स्थाने उत्तमे च शंतुः स्तु २१
खस्तरिति। चिकित्वः धर्मविषयचेतनावान्। हि अग्न तस्ययः वचोपिशब्दभावः। होता निरूपितः। तस्य होतुः अनुध

मेधर्माचुते नानुष्ठितधर्मानुपसदस्य २ ऽ यजप्रकर्षेण देवान् जय। अथानंतरं हे अग्ने नो अस्माकं संबंधिने
मध्वरमिमं यज्ञं दववीतो देवानाग्नीत्यर्थः विधिविधेहि यजीयान् ३। ऽ यजशब्दस्य तु छंदसीति इयसुनतस्मिन् तु
शिष्टामयस्त्विति शब्दलोपः। निवादाक्ष दाशः। कृति। हिंशा श्वाल्संस्थायां विधात्वर्थधिति धात्व प्रत्ययः। धकारस्य
तकारश्छांदसः। प्रत्ययस्वरः। सज्ञा। षद्लृ विशरणगत्यवसादनेषु। अस्येतानीलिकस्तन्निस्वरः। स्वधया
स्वर्गलोकं दधातीति यजमानस्य तिस्वधा। आतो नुपसर्गे क इति क प्रत्ययः। कृदुत्तरपदप्रकृतिस्वरः। शं
सुः। शंसु रवं अस्मान वतीति। स्त्वसंज्ञायां। विपसंस्थाद्रुसंज्ञायामित्यत्र मितद्र्वादिरुपसंख्यानात् डुप्रत्ययः। डि
त्वाडिलोपः। यज। ऽ य जालाटि रूपं। चिकित्वान्। कितज्ञाने इत्यस्य क्वसोरूपं। मंतुवसोरुः संबुद्धौ छंदसी
तिनकारस्यरुः। अथानः। निपातस्य तिदीर्घः। ऋधाऋभ्रश्वाणपापणयोरित्यस्य छांदसलुङि रूपं। अडभाव
श्छांदसः। ददवीतो। दवानांवीतिरशनं यत्रपीतोसा पीतिर्दद्वीतिः। वीकांत्यादिष्विति सामावक्रिन्। बह्व
व्रीहौ पूर्वपदप्रकृतिस्वरः। इति तृतीयस्य प्रथमे सप्तदशो वर्गः॥ ॥नवानो अग्न इति पंचर्चं षष्ठं सू
क्तं नवान इत्यनुक्रमणिका। कात्यविश्वामित्रस्याद्येति। उक्तं ग्रायागादेश्यापि विश्वामित्रः कृतऋषिः अग्नि

Indira Gandhi National
Centre for the Arts

दैवता यातरत्तुवा काश्चिनशास्त्रयोरुक्तः स्वक्व विनियोगः॥ प्रवर्ग्ये निष्टवत्तवानो॥ अयमितिश्रुचोवि निम्नक्तः
नवानो अयमस्तु समाआपतो वितिश्रुचा इति तस्मिन्स्त्रक्विप्रथमा सवानइति॥ हे अग्ने अंआपातो अस्मात्तिः
क्रियमाण प्रवर्ग्यारम्भस्य कर्मोत्तिरवे नागमने स्तु मनातकर्मसिध्यर्थं मनुष्कलमनस्कोन्तुत्था नासा धुर्नव
अस्म झंबोधिकर्मसाधकोसव। तत्रदृष्टान्तद्वयं सखेव सखायं पितरावितिय थासखासु इतसखेमित्रायहि
तापदेशेन साधुर्भवति यथा च पितरा माता पितरो उभौ यस गन्मागोयदशेना साधकोसवत॥ तदुक्तं किंच।
जनानां मनुष्याणां हिता यामनुष्याः भेरु हा हिनानाविध देहयुक्ताः हिंशदः कारणपराः यस्मा लोके
परस्परमञ्जयादिनान्योन्यमसहमाना जनानावर्तते। तस्मात्त्वं प्रतीचीः॥ प्रतीचाः इति क्रुलनया समदास्तिसुखेना
नागच्छतः अ॰ रातीः अरातीन् शत्रून्प्रति दहतं। तान्नूं। प्रतिकूलाः सन्नः समसा कुरुसवने॥ भ्यातास्त्विड॰
इतिर्हा हिता यो दीर्घः॥ आपातो॥ इएगातो॥ अनयमितिस्ना वर्त्निः॥ प्रादिसमासः तादोचनितिकुत्यताविति
गातः प्रकृतिस्वरत्वं॥ सख्यो॥ समानेरख्यश्चोदात्त इति इण॥ डित्वादि लोपः॥ तत्रैव नियोगनयलोपः॥ समानस्य सम
नस्यच्छंदसी त्यादिना सभावः॥ उदात्त इत्कवा ऽपपदस्योदात्तता॥ झं धु॥ राधसाधसंसिध्यौ॥ कृवापाजीसाधि ३८

नाउणप्रत्ययः॥ प्रत्यस्वयस्वरः॥ प्रतीचीः॥ अंचु गतिपूजनयोः॥ ऋत्विग्दधृगित्यादिना क्विन्॥ स्त्रियांउगितश्चेति ङी
पि प्राप्ते उनः ध्वातारुगितः अ तिप्रिध इति प्रतिषिद्धे अंचातश्चोपसंख्यानमिति अतिप्रसवात्ङीप्॥ तस्मिन्नसे
ज्ञायां अच इत्यकारलोपः॥ चाविति दीर्घः॥ दहतात्॥ ॰ दहनस्मीकरण इत्यस्य लोट मध्यमैकवचने हेस्तुह्योस्ता
तङाशिष्यति तातङादेशः॥ निघातः॥ अरातीः प्रतीचीः उभयत्र लिंगमत्पयः॥ ॥अथ द्वितीया तपोष्वग्न इति
ह अग्ने अरातीन् अतिरस्नावकान मित्रान्त्र नस्तुत्यथान वतित्त धातापात तपोचबाधस्व। किंच। अररुषः उ
स्यहविरप्रयच्छतः। अत एव परस्पशाहत्वतस्य स्वं ज्ञं सं अनिलाषं तपदस्पपयवासा सर्वस्य वासयितः हे अग्ने
चिकितानः कमीलिङ्गस्वेश्चर्चितान्सकर्मण्पनासक्तमनस्काः उरुषान्ताप सत्तपय स्मादेवं तस्मान्नेर
वरश्रमयुः अजराः जरारहिताः प्रतिबंधरहिताः अत एव अयासः सर्वत्र गमनस्वभावः सन्तो विशिष्टताविशे
षेणतिष्ठ आतापा तप उणः॥ उ अमसंख्यम उ अ इति अथ ह्रस्वसंज्ञा॥ यादादिवाद निघातः॥ तपात पसंताप इ
त्यस्य लोट्हिलोपः॥ च्यावात स्त्विङ इति संहितायां दीर्घः॥ अररुषः॥ रादानइत्यस्य कासौ वस्वेकाजिति नात्रस्य
टः संप्रसारणौ संप्रसारणाश्रयं च बलीय इति संप्रसारण बलीयस्त्वान्निष्टहिं वासोः संप्रसारणमिति संप्र

Indira Gandhi National Centre for the Arts

सारणं॥ समासेनत्रः स्वरः॥ चिकितानः॥ कितज्ञाने इत्यस्य छंदसि लिटि तस्य लिटः कानच् तिकानजो द्व्यः॥
द्विर्वचने किं वा गुणस्तावः॥ चित्तादंतादात्तः॥ तिष्ठतां श्रागति निघातः॥ विश्वामित्रात् समवत्रविस्यः स्वर
तिआत्मनेपदं निघातः॥ अयासः॥ अयगतौ पचाद्यच्॥ विस्वरः॥ ॥अथ तृतीया॥ अस्मे ना इ इति द्वे अस्मे इ
छमानः धनं कामयमानो यजमानः इध्मेन समिंधेन कारिसमिध्यस्व हन घृतेनाज्येन सह हवं स्वन
योगपेह विः पुरोडाशादिकं जुहोमि किमर्थं तरसे विगायत च सततगमनसिध्यर्थं विलाय सामथ्याय
ष्ठुरोडाशादि हविलारिव हन सिध्यर्थं विधियि इविः श्वद्विपामि किंच अन्नेण स्तोत्रेण वंदमानः स्तोवंदनमह
यावदीशो॥ यावद्धदनं वाडुशक्नोमि तावद्दृहिं वेच इमो अस्माभिः क्रियमाणां धियं च विषयां स्तुतिं श
नासयाय अपरिमितधनपर्यवसानाय द्वीदीशो अतिप्रस्तूतां ऊरुः इध्मेनाग्नीधीदीशो इध्यात नेनाग्नि रि
तिरिध्मकाष्ठविशेषः इति सुधिदं सिध्यपाधस्त्यो मगि ग्रिकरणे मक्तः किञ्चादत्तुनासिकलोपः॥ प्रत्ययस्वरः॥ इ
छमानः॥ इषु इच्छायां॥ अस्तायं नशानचा इषुगमिय मां छ इति छकारः॥ जुहोमि॥ ऊदानादनयोरित्यस्मालि ३९
टिरूपं पादादित्वाद निघातः॥ इम्यांहविनमदीति छंदसि चितियप्रत्ययाः॥ नसंज्ञायां यसाति लोपः॥ प्रत्ययस्वरः॥

यावत्राय छंदा लयच्छदे विस्याः परिमाणे वतुबिति वतुप्॥ आ सर्वनाम्न आकारः॥ आद्युदात्तः॥ ईशे॥ ईश ऐश्वर्य
इत्यस्य लडुत्तमैकवचने इटः टेरेत्वं अदादित्वाच्छपो लुक्॥ शात शाया याषात कर्म्मणि॥ आद चउपदाश
शितीत्यात्वं॥ आचायदिति स्तावेयतः इद्यतीति ईत्वं॥ आर्द्धधातुकलक्षणो गुणः॥ कृदुत्तरपदप्रकृतिस्वरः॥ ॥
अथ चतुर्थी॥ उक्तो चिषाथिः सहसस्कृतरहे आग्नशो॥ चिषास्वकीयया दीप्त्या उद्दीप्यस्वास्तुतः स्तोत्रशास्त्रसाधन
स्तुतिमंत्रैः स्तुतस्त्वं शशमानेभ्यः शशमानाः शंसमान इतिक स्कः॥ द्विपयशोसने कुर्वाणो विश्वामित्रस्तु।
विश्वमत्रमास्याति विश्वामित्रः एकएकस्मिन्बहुवचनं इजार्थी तथाविधेय स्मास्वारव धनयुक्तं बृहत् सनत्त
